PRACTICE PAPER FOR II PREPARATORY EXAMINATION
2014-2015
STD:- IX

**Sub: - Sanskrit** **Time:- 3 Hours**
**Date:-** **Marks:- 90**

निर्देशा ः

1 परीक्षापत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| क | अपठित अवबोधनम् | 10 अंक |
| ख | रचनात्मक लेखनम् | 15 अंक |
| ग | अनुप्रयुक्त व्याकरणम् | 30 अंक |
| घ | पठित अवबोधनम् | 35 अंक |

2 सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

3 प्रश्नसंख्या प्रश्नप्रत्रानुसारम् अवश्यमेव लेखनीया।

4 प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

## खण्ड 'क'
## अपठित अवबोधनम्

**क.1) अधोलिखितं अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।**

एकदा केचन शिष्याः भिक्षाटनं कुर्वन्ति स्म।तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत्।गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः पुनः घोषयति स्म-अपसरन्तु अपसरन्तु इति।सर्वे शिष्याः धावितवन्तः।यथा सर्वेषु वस्तुषु ईश्वरः अस्ति तथा गजेऽपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्।तावति काले गजः तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान्।शिष्याः मूर्च्छितम् तं गुरूकुलम् अनयन्।लब्धसंज्ञं तं गुरूः अपृच्छत् वत्स त्वम् एवं किमर्थम् आचरः इति।शिष्यः अवदत् -गुरूवर्य भवद्भिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति।अतः अहं गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति।गुरूः उक्तवान्- वत्स!यथा गजे तथा हस्तिपके अपि ईश्वरः इति कथं न चिन्तितम् इति

**(क) एकपदेन उत्तरत।** **(2)**

1 गजः कं गृहीत्वा स्वशुण्डया प्राक्षिपत्?

2 'अपसरन्तु अपसरन्तु' इति कः घोषयति स्म?

**(ख) पूर्णवाक्येन उत्तरत।** **(2)**

1 यदा गजः आगतः तदा शिष्याः किम् अकुर्वन्?

2 गुरूः किं उक्तवान् ?

**(ग) भाषिक कार्यम्।** **(4)**

1 अस्मिन् अनुच्छेदे 'अनयन्' क्रियापदस्य कर्तृपदं किम्?

(i) गजः (ii) शिष्याः (iii) हस्तिपकः (iv) गुरूकुलम्

2 'वेगेन' अस्य पदस्य विशेषण पदं किम्?

(i) एकः (ii) उपरि (iii) तस्मिन् (iv) महता

3 गद्यांशे 'हस्ति' इति अर्थे किं पदं प्रयुक्तम् ?

(i) शुण्ड (ii) हस्तिपकः (iii) गजः (iv) न कोऽपि

4 तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान्। अत्र तं सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) शिष्याय (ii) गुरवे (iii) गजाय (iv) हस्तिपकाय


(घ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। (2)

## खण्ड 'ख'

## रचनात्मक कार्यमं

**ख.1) चित्रं दृष्टवा पञ्च वाक्यानि संस्कृते लिखत।** **(10)**

(मञ्जूषा - बन्दी, आरक्षकः, बन्धनेन, भवनानि, जनसम्मर्दः, वृक्षाः, नयति, दर्शकाः,प्रमुदिताः, अनुसरन्ति )



**अथवा**

**मञ्जूषातः उचितानि पदानि चित्वा 'मम प्रथम शैक्षिकभ्रमणम्' विषये पञ्चवाक्यानि रचयत।**

(मञ्जूषा - अध्यापकाः, जयपुरम्, मित्राणि, आनन्देन, बसयानेन, बृहद् दुर्गाणि, स्मारकाणि, राजधानीं,लोकनृत्यानि, राजस्थानीवार्ता , प्रतीकानि, अस्माकं सभ्यतायाः शस्त्राणि )

ख.2) भवान् प्रतापः। भवता संस्कृतनाटके कृष्णस्य भूमिकायै अभिनयःकृतः सर्वोत्तम अभिनयस्य पुरस्कारः च प्राप्तः। तत् सूचयता भवता स्वपितरं प्रति लिखिते पत्रे मञ्जूषातः पत्रं पुनः लिखत। (5)

छात्रावासः

नवोदयविद्यालयः

1...........

परमपूज्यपितृचरणयोः

2...........वन्दनम्।

अहम् अत्र भवतः आशीर्वादेन स्वस्थः अस्मि। मम विद्यालये एका संस्कृतनाटक प्रतियोगिता 3.........। अहम् तस्याम् श्रीकृष्णस्य अभिनयं 4...........। दुर्योधनस्य सभां प्रविश्य अहं पाण्डवान् कृते 5.........ग्रामान् एव 6...........। दुर्योधनः माम् ग्रहीतुं यत्नं कृतवान्। सर्वैः दर्शकैः 7...........कृतम्। अहम् सर्वोत्कृष्ट अभिनेतुः 8...........प्राप्तवान्।

नमः 9...........।

भवदीयः प्रियः पुत्रः

10..............

(मञ्जूषा - याचितवान्, सादरं, जयपुरतः, पञ्च, अभवत्, पुरस्कारं, करतलवादनं, प्रतापः, मातृचरणाभ्याम्, कृतवान्)

## खण्ड 'ग' अनुप्रयुक्त व्याकरणम्

ग.1 अधोलिखितान् उचितविभक्तियुक्तं पदं चित्वा वाक्यपूर्तिः क्रीयताम् । (6)

1 माता________ भोजनं यच्छति।।

(i) भवतः (ii) भवन्तम् (iii) भवान् (iv) भवते

2 राजसभा ________ अलंकृता आसीत्।

(i) विद्वानेन (ii) विदुषेन (iii) विद्वांसः (iv) विद्वद्भिः

3 ऋषिः ________ भक्त्या प्रसन्नः अभवत्।

(i) राज्ञः (ii) राजस्य (iii) राज्ञा (iv) राजास्या

4 दर्पणे जनाः _______ एव पश्यन्ति।

(i) आत्मानम् (ii) आत्मनः (iii) आत्मना (iv) आत्मनि

5 मम पुस्तकम्________ समीपे अस्ति।

(i) भवता (ii) भवद्भ्यः (iii) भवतः (iv)भवान्

6 ________ बालकस्य विद्यालयः कुत्र अस्ति ?

(i) गच्छन् (ii) गच्छतः (iii) गच्छन्ती (iv) गच्छन्तः

ग.2 अ) विकल्पेभ्यः शुद्धं उत्तरं विचित्य रिक्तस्थानानि पूरयत। (6)

1 ________ वाटिकायां घटस्योपरि काकः अतिष्ठत्।

(i) एकं (ii) एकस्याम् (iii) एकस्मिन् (iv) एकाम्

2 अद्य मम गृहे ________ शिक्षिकाः अपि आगमिष्यन्ति।

(i) चत्वारः (ii) चत्वारि (iii) चतस्त्रः (iv) चत्वारम्

3 ________गुरूषु मम विश्वासः अस्ति।

(i) चतुर्षु (ii) चतुस्त्रषु (iii) चतुर्सु (iv) चत्वारः

4 जनाः ________ नेत्राभ्याम् पश्यन्ति।

(i) द्वयोः (ii) द्वे (iii) द्वौ (iv) द्वाभ्याम्

ब) कोष्ठके प्रदत्तयोः संख्यावाचकशब्दयोः उचितरूपं प्रयुज्य वाक्ये पूरयत।

1 ________ मित्रे पित्रा सह कन्दुकेन अक्रीडताम्। (द्वि)

2 दशरथस्य ________ राज्ञयः आसन्। (त्रि)

ग.3) अधोलिखित वाक्येषु उचित क्रियापदानि योजयित्वा वाक्यानि पूरयत। (6)

1 सर्वेभ्यः जनेभ्योः नववर्षस्य वर्धापनं ________ ।

(i) भवतु (ii) भवताम् (iii) भवन्तु (iv) भव

2 युवाम् सद्गुरूं प्रश्नं ________ । (पृच्छ्)

(i) पृच्छेताम् (ii) पृच्छेत (iii) पृच्छेतम् (iv) पृच्छेयुः

3 अहम् अध्ययन विषये ________ ।

(i) चिन्तयेत् (ii) चिन्तयेव (iii) चिन्तयेम् (iv) चिन्तयेयम्

4 छात्राः प्रतिदिनं विद्यालयं ________।

(i) गच्छेत् (ii) गच्छेयम् (iii) गच्छेयुः (iv) गच्छेम

5 भवन्तौ यशः मानः च________।

(i) लभस्व (ii) लभेताम् (iii) लभै (iv) लभताम्

6 त्वं साधूनां सेवां ________।

(i) कुर्युः (ii) कुर्यात् (iii) कुर्याः (iv) कुर्याम

ग.4) अधोलिखित वाक्येषु कोष्ठकगत शब्दं आधृत्य उचित विभक्ति प्रयोगेन पूरयत। (6)

1 ________ हीनः सः वृद्धः मम पितामहः अस्ति ।

(i) दन्तेन (ii) दन्तैः (iii) दन्तेभ्यः (iv) दन्तः

2 ________ अनन्तरं प्रयागः वर्तते।

(i) वाराणस्याः (ii) वाराणस्यया (iii) वाराणस्यै (iv) वाराणसीम्

3 ________ अनुरक्तस्य भक्तस्य कल्याणं भवति।

(i) ईश्वरम् (ii) ईश्वरस्य (iii) ईश्वरे (iv) ईश्वरात्

4 ________ समया मा उपविश अहं रूग्णः अस्मि।

(i) मम (ii) माम् (iii) मया (iv) मह्यम्

5 त्वम् ________ कदापि न विश्वस।

(i) दुष्टे (ii) दुष्टेषु (iii) दुष्टं (iv) दुष्टानाम्

6 ________ पश्यतः छात्रः कक्षायाः वहिः अगच्छत्।

(i) शिक्षकम् (ii) शिक्षके (iii) शिक्षकस्य (iv) शिक्षकाय

ग.5 अ) प्रत्यय संयोजनं विच्छेदं वा कृत्वा लिखतु। (6)

1 द्वौ छात्रौ विद्यालयं ________ । (गम् +क्तवतु)

2 मया प्रातराशे दुग्धं ________ । (पा + क्त)

3 सर्वे छात्राः कुसंगति त्यक्तवन्तः। (____ +____)

ब) अधोलिखित प्रत्यययोगेन निर्मितम् उचितं पदं चित्वा लिखत।

1 माता ________ बालिकया सह भाषते।

(i) पठन्ती (ii) पठन्त्या (iii) पठन्तः (iv)पठितया

2 सुशीला कदा गृहं ________ ?

(i) गतः (ii) गता (iii) गताः (iv) गतम्

3 त्वया कुतः एषः ग्रन्थः ________ ?

(i) क्रीतम् (ii) क्रीतौ (iii) क्रीताः (iv) क्रीतः

## खण्ड ‘घ’

## पठित अवबोधनम्

घ.1 अ) अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।

अन्येद्युः सः मुनिः समन्विष्य तं धर्मव्याधं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्।धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत-" ब्रह्मन्! किं पतिव्रतया तया इह त्वम् प्रेषितः" तत् आकर्ण्य स मुनिर्विस्मितः तं धर्मव्याधम् अवदत् - भद्र! मांसविक्रियणः ते कथम् ईदृशं विज्ञानम् ? धर्मव्याधः अवदत्- "ब्रह्मन्! अहं मातापित्रोर्भक्तः। तौ हि मम परायणम्।"

(क) एकपदेन उत्तरत। (1)

1 धर्मव्याधः किं विक्रिणति स्म?

2 मातापित्रोः भक्तः कः आसीत्?

(ख) पूर्णवाक्येन उत्तरत। (1)

धर्मव्याधः मुनिं किं प्रश्नम् अपृच्छत्?

(ग) भाषिक कार्यम्। (2)

1 श्रुत्वा, इति पदस्य पर्यायपदं अनुच्छेदात् एव चित्वा लिखत।

(i) अन्येद्युः (ii) दृष्ट्वा (iii) आकर्ण्य (iv) इह

**2** इह त्वम् प्रेषितः, अत्र त्वम् इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) मुनये (ii) धर्मव्याधाय (iii) गृहिण्यै (iv) बलाकायै

(घ) जीवने कौ परायणम् भवेत् ? **(1)**

**ब) अधोलिखित पद्यांशं पठित्वा प्रश्नान् उत्तरत।**

धत्ते भरं कुसुमपत्रफलावलीनां घर्मव्यथां वहति शीतभवां रूजं च।
यो सर्वमर्पयति चान्यसुखस्य हेतोः तस्मै वदान्यगुरवे तरवे नमोऽस्तु।।

(क) एकपदेन उत्तरत। **(1)**

**1** कः अन्यसुखाय सर्वम् अर्पयति?

**2** कीदृशाय तरवे नमः अस्तु?

(ख) पूर्णवाक्येन उत्तरत। **(1)**

**1** वृक्षः किं किमर्थं च अर्पयति?

(ग) भाषिक कार्यम्। **(2)**

**1** 'अर्पयति'इति कियापदस्य किं कर्तृपदम्?

(i) भरं (ii) सर्वम् (iii) यः (iv) अन्यः

**2** पीडाम् इति पदस्य श्लोके किं पदं प्रयुक्तम्?

(i) शीतभवाम् (ii) रूजम् (iii) भरम् (iv) व्यथाम्

(घ) मूल्यपरकप्रश्नं- अन्यसुखस्य हेतोः किं कुर्यात् ? **(1)**

**स) संवादं पठित्वा प्रश्नान् उत्तरत।**

प्रतापः - श्रुतपूर्व इव स्वरः? (सैनिकं प्रति) वृक्षम् आरूह्य दृश्यताम् कः एषः शब्दापयति ?

सैनिकः - (निपुणं निरीक्ष्य) महाराज। मेवाडमन्त्री भामाशाहः खल्वेषः।

जनकः - अये भामाशाहः आगतः। कथमस्माकं दौर्भाग्यं भवताऽपि परिज्ञातम् (भामाशाहः धनराशिमादाय आयाति)।

भामाशाहः - (सप्रणामम्)अन्नदातः। सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

प्रतापः - (दीर्घं निःश्वस्य) न क्वापि बन्धो। गन्तुमपि न शक्यते। धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः।

(क) एकपदेन उत्तरत। **(1)**

**1** तत्र कः आगतः आसीत्?

**2** प्रतापः कयोः अभावे पर्याकुलः आसीत्?

(ख) पूर्णवाक्येन उत्तरत। **(2)**

**1** भामाशाह किम् आदाय आगच्छति?

(ग) भाषिक कार्यम्। **(2)**

**1** गद्यांशे 'अवलोक्य' इति पदस्य समान अर्थ लिखत।

**2** अत्र भवान् इति सर्वनामपदं कस्मै प्रयुक्तम्?

**3** मूल्यपरक प्रश्न- देशरक्षणाय कस्य मोहः न कर्त्तव्यम् ? **(1)**

**घ.2) अधोलिखित श्लोकयोः अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत। (5)**

(क) छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरूषा इव।।

अन्वयः – **1** _____ छायाम् कुर्वन्ति , **2** ______च आतपे **3**_____ ।(एतेषां) फलानि अपि **4**_____ (भवन्ति) ।वृक्षाः **5**_______ इव (आचरन्ति)।

(ख) विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयत्
भूतले भाति मेऽनारतं भारतम्।।

अन्वयः — पावनम् विश्वबन्धुत्वम् **1** _____ विश्ववन्द्यैः, **2** _____ जगत्पावयत् विश्वम् एकम् **3**_______समालोकयत् मे **4**_________भूतले **5**__________भाति।

**मञ्जूषा**

| |
|---|
| उद्घोषयत् ,अन्यस्य , चरित्रैः , स्वयम् ,सत्पुरूषाः , कुटुम्बं, परार्थाय, भारतं ,तिष्ठन्ति, अनारतं |

**घ.3) वाक्येषु रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरूत। (5)**

1 भारतीय विज्ञानम् <u>सर्वहिताय</u> अस्ति।
2 भारते <u>गंगायमुनादय</u>ः नद्यः वहन्ति।
3 अत्र जनाः <u>व्याधिना</u> पीडिताः न भवेयुः।
4 <u>गुणग्राही</u> स्वामी पुण्येन लभते।
5 एषा कथा <u>भरतमुने</u>ः नाट्यशास्त्रे वर्णिता।

**घ.4) कथाक्रमानुसारं अधोलिखितानि वाक्यानि पुनः लेखनीयानि। (5)**

1 मुनिः तपः प्रभावात् अहंकारी अभवत्।
2 एकदा मुनिः ब्राह्मणगृहं गच्छति ।
3 स्वधर्माचरणम् कर्त्तव्यम् इति धर्मव्याधः कथयति।
4 पतिव्रता विहस्य अवदत् न अहं बलाकेति।
5 मुनेः क्रोधदृष्ट्या बलाका भस्मसाद् अभवत्।
6 प्रतीक्षस्व क्षणम् यावत् भर्तुः परिचर्या समापये इति गृहिणीं अवदत्।
7 कथं त्वया अनन्यगोचरः बलाकावृत्तान्तः ज्ञातः।
8 पुरा महातपा नाम एक मुनिः आसीत्।
9 एकदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्।
10 एतत् श्रुत्वा सः मुनिः तां कोपदृष्ट्या दृष्टवान्।

**घ.5) अधोलिखितवाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थ चित्वा लिखत। (5)**

1 मुनिः अहंकारम् <u>उपगतः</u> ।
(i) गतः (ii) प्राप्तः (iii) उत्पतितः (iv) उचितं

2 स्वदेशं <u>पारतन्त्रयात्</u> मोचयितुम् योत्स्यामहे।
(i) स्वाधीनतायाः (ii) पराधीनतायाः (iii) परेषां बुद्धेः (iv) मातृभूमे

3 भवान् एव <u>मे</u> गुरूः
(i) मया (ii) मम (iii) मयि (iv) माम्

4 अहं पित्रा सह <u>क्षिप्रम्</u> आगमिष्यामि।
(i) शीघ्रम् (ii) विलम्बेन (iii) विज्ञाय (iv) सदैव

5 एतत् प्रजायाः <u>सकाशाद्</u> आगतम्।
(i) पार्श्वात् (ii) जनात् (iii) दूरतः (iv) प्रसादात्

---------XXX--------